M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.
Ser. 457

Title: Sudarshana Kavacha

457

(सुदर्शन कवच – माला मन्त्र

Title: Sudarshana Kavacha & Mālā Mantra.

Author:

Editor:

Year, Vols.:

Publisher:

Remarks:

457

457

श्रीगणेशायनमः॥ अस्यश्रीसुदर्शनकवचस्तोत्रमंत्र
स्य॥ अहिर्बुध्न्यभगवान्ऋषिः॥ अनुष्टुप्छंदः॥ श्रीसुदर्श
नपरमात्मादेवता॥ सहस्रारइतिबीजं॥ सुदर्शनइतिश
क्तिः॥ चक्रराजइतिकिलकं॥ ममशरीरसंरक्षणार्थेसर्वा
भीष्टफलसिध्यर्थेजपेविनियोगः॥ ॐ ह्रां अंगुष्ठाभ्यांन
मः॥ ॐ ह्रीं तर्जनीभ्यांनमः॥ ॐ ह्रूं मध्यमाभ्यांनमः॥ ॐ १
ह्रैं अनामिकाभ्यांनमः॥ ॐ ह्रौं कनिष्ठिकाभ्यांनमः॥ ॐ ह्रः

करतलकरपृष्ठाभ्यांनमः॥ एवंहृदयादिन्यासः॥ भूर्भुव
स्वरोमितिदिग्बंधः॥ अथध्यानं॥ शंखंशार्ङ्गंसुखेटंपरशु
मसिमिषुंशूलपाशांकुशास्त्रं बिभ्राणंवज्रखेटंहलमुसल
गदाकुंतमत्युग्रदंष्ट्रं॥ ज्वालाकेशंत्रिनेत्रंज्वलदनलनिभंहा
रकेयूरभूषंध्यायेषट्कोणसंस्थंसकलरिपुजनप्राणसं
हारचक्रं॥ १॥ मस्तकंमेसहस्रारःपातुफालंसुदर्शनः॥ भ्रू
मध्येचक्रराट्पातुनेत्रेसूर्येंदुलोचनः॥ २॥ कर्णौवेदस्तुतः

पातुघ्राणंपातुबिभीषणः॥महादीप्तःकपोलौच ओष्ठौरु
॥२॥ द्रवरप्रदः॥२॥दंतान्पातुजगद्वंद्योरसनंममसर्वदा॥सर्व
बीजाधिपःपातुममवागीश्वरोगिरं॥३॥नारसिंहेमुखंपा
तुचुबुकंभक्तवत्सलः॥सर्वदापातुमेकंठंमेघगंभीरनि
स्वनः॥४॥ममस्कंधयुगंपातुधराभारावतारकः॥बाणा
सुरभुजारण्यादावाग्निःपातुमेभुजौ॥५॥कालनेमिशि
रश्छेत्तापातुमेकूर्परद्वयं॥कंठोदिव्यायुधःपातुनखान्व ॥२॥

ज्रनखोमम॥६॥कक्षौपातुमहाशूरोस्तनौशत्रुविमर्दनः
पातुमेत्हृदयंनित्यंजनानंदकरस्तथा॥७॥सर्वशास्त्रार्थसं
भाव्योहेतिःपातूदरंमम॥कुक्षिंपातुमहाघोरोदैत्यसदान
वभंजनः॥८॥पार्श्वौमेपातुदीनार्तशरणागतवत्सलः॥
वै सदापृष्ठंदेहंमेदेवानामभयप्रदः॥९॥नाभिंषट्कोणया
मोमेपातुखड्गारवः कटिं॥आदिमूर्तिःपुमान्पातुगुह्य
देशंनिरंतरं॥१०॥ऊरूपातुमहाशूरोजानुनीभीमविक्रमः॥

जंघोपातु महावेगो गुल्फौ दीनार्तिभंजनः ॥२१॥ पादौपा
॥३॥ तु महासिंह ब्रह्माद्यैरभिवंदितः ॥ पातु पादतलद्वंद्वं विश्वा
धारो निरंतरं ॥२२॥ सुदर्शननृसिंहो मे शरीरं पातु सर्वदा ॥
मम सर्वांगकांतिमे कल्पांताग्निसमप्रभः ॥२३॥ मम सर्वां
गकार्याणि ज्वालाकेशश्च रक्षतु ॥ अंतर्बहिश्च मे पातु वि
श्वात्मा विश्वतोमुखः ॥२४॥ रक्षाहीनं च यत्सर्वं प्रचंडस्तत्र र ॥३॥
क्षतु ॥ सर्वदा दिक्षु मे पातु ज्वालासहस्रसंवृतः ॥२५॥ ॐ

नमो भगवते सुदर्शनाय भो भो सुदर्शन दुष्टं ताडय ता
डय दुरितं हन हन पापं दह दह रोगं मर्दय मर्दय आरोग्यं
कुरु कुरु ॥ ॐ अं ह्रां ॐ दं ह्रीं ऐं उं हं फट् फट् हन हन द्विषट्
मुलं१ हुं फट् स्वाहा ॥ इति सोदर्शनं दिव्या कवचं सर्वकामदं ॥ स
र्वबाधाप्रशमनं सर्वव्याधिनिवारणं ॥१॥ सर्वशत्रुक्षयक
रं भोगमोक्षैकदायकं ॥ प्रातरुत्थाय यो भक्त्या पठते सत
तं नरः ॥२॥ तस्य सर्वेषु कार्येषु विघ्नः कापि न जायते ॥ यश्च

राक्षसक्षेताल भैरवाश्चविनायकाः ॥३॥ शाकिनीडाकिनी
।४।। मारीमारिका खेटकादयः ॥ भूतप्रेतपिशाचाश्चयेन्येदु
ष्टग्रहादपि ॥४॥ ब्रह्मग्रहाश्चयेसर्वेपलायंतेविदारतः ॥
कवचस्यचजप्तॄणांदृष्टिमात्रेणतेखिलाः ॥५॥ पलायंते
महानागापक्षिराडदर्शनाद्यथा ॥ अस्यायुतंपुरश्चर्याद
शांशंतेनतर्पणं ॥६॥ चतुर्विंशद्विजाभोज्यास्ततःकार्याणि ।।४।।
साधयेत् ॥ विन्यस्यांगेप्यथोधीरोयुस्वार्थेयोधिगच्छति ॥७॥

क्षणेजित्वाखिलान्शत्रून् विजयीभवतीध्रुवं ॥ मंत्रितां
बुत्रिवारंवापिबेद्यस्पठनादिभिः ॥८॥ व्याधयःप्रतिनश्यं
तिसकलाःकुक्षिसंभवाः ॥ मुखप्रक्षालनान्नेत्रेनानाभयनि
वारणं ॥९॥ भीतानामभिषेकेणमहाभयनिवारणं ॥ सप्तभि
र्मंत्रितांगेषुतुलसीमूलमृत्तिका ॥१०॥ लेपान्नश्यंतिवैरोगाः
नस्यकुष्ठादयोखिलाः ॥ ललाटेतिलकंनॄणांमोहनंसर्व
वश्यकृत् ॥११॥ परेषांमंत्रतंत्रादिक्रियाणांचप्राणाशनं ॥

आदिसर्पादिसर्वेषांविषापहरणंशुभं॥२२॥सुवर्णरजतेपा
॥५॥ त्रपत्रेभूर्जादिकेपिवा॥लिखित्वापूजयेद्यस्तुसश्रीमान्भ
वतीध्रुवं॥२३॥बहुनात्रकिमुक्तेनयद्यद्वांछतिमानवाः॥पु
त्रार्थीप्राप्नुयात्पुत्रंराज्यार्थीराज्यमाप्नुयात्॥सकलंप्रा
प्नुयात्तस्यकवचस्यप्रसादतः॥२४॥इतिश्रीविहगेंद्रसंहि
तायांअगस्त्यप्रोक्तंसुदर्शनकवचंसंपूर्णं॥ ॥छ॥ ॥५॥
॥श्रीकृष्णार्पणमस्तु॥ ॥श्रीसदाशिवार्पणमस्तु॥

श्रीगणेशायनमः॥अथमालामंत्र॥ॐब्रह्मसुदर्शनच
क्रराजसर्वदुष्टभयंकरछिंदिछिंदिभिंदिभिंदिविदारय
विदारयपरमंत्रपरयंत्रपरतंत्राद्यौषधकृत्रिमांदहदहभ
स्मीकुरुभस्मीकुरुहनहनहुंफट्स्वाहा॥अस्यश्रीसुदर्श
नमालामंत्रस्य॥अहिर्बुध्न्यभगवान्ऋषिः॥अनुष्टुप्छंदः
श्रीमहासुदर्शनोदेवता॥ॐबीजं॥ह्रांशक्तिः॥ह्रींकिलकं
॥रक्तवर्णः॥ममसुदर्शनप्रसादसिध्यर्थेजपेविनियोगः॥
रूपीमाहांविष्णुर्देवताश्रीसुदर्शन

ॐश्रांह्रींक्लींऐंश्रीसुदर्शनचक्रराजेदेवताजयजयवि
॥२॥ जयविजयअनंतानंतअप्रतिहतअप्रतिहतअनपाइन्न
अनपाइन्नविकटाविकटावीरावीराउग्रउग्रचंडचंडप्रचं
डप्रचंडभीषणभीषणभैरवभैरवभर्गभर्गज्वलज्वलदह
दहपचपचसर्वदुष्टभयंकरसर्वज्वरनिवारणछिंदिछिं
दिभिंदिभिंदिनिधिनिधिपरमंत्रपरयंत्रपरतंत्रपरभूता ॥२॥
नित्रासयत्रासयचूर्णयचूर्णयहुंफट्स्वाहा॥वनमालिक्षी

राब्धिनायकमांरक्षरक्षममशत्रून्नाशयनाशयमामाभी
ष्टंकुरुकुरुस्वाहा॥ॐनमोभगवतेसकलपरग्रहनिवारणा
यसकलपातकनिवारणायकाशीक्षेत्रनिबर्हणायबा
णासुरबाहुवनदावाग्नयेअपरिमितदिव्यास्त्रतेजोरूपा
यकल्पांतदहनायश्रीमहाविष्णवेशंखचक्रगदाधरायलक्ष्मी
समेतायअघनाशनकीर्तनायश्रीमहाविष्णवेह्रांह्रींह्रूं
ह्रैंह्रौंह्रःक्ष्रांक्ष्रींक्ष्रूंक्ष्रैंक्ष्रौंक्ष्रः॥सुदर्शनरूपेश्रीमहाविष्णु
ॐमुक्तमंत्रलक्ष्मीबीजविरहिते
सकनलक्षणावा

॥२॥ देवताप्रसादेनममसर्वाभीष्टसिद्धिरस्तु ॥ इतिमालामं
त्रंसंपूर्णं ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ श्रीसदाशिवप्रसन्न ॥

॥२॥